तर्क
त. टी.
१

ॐ श्रीगणेशाय नमः ॥ विश्वेश्व
र्कसंग्रहदीपिकां ॥ चिकीर्षि
तिस्कृतिबोधितकर्तव्यताकमि
कीर्षितं प्रतिजानीते ॥ निधायेति
ष्किरणावल्यादौ समाप्त्यर्थं
चारादिति चेन्न ॥ किरणावल्यां

ॐ निधाय हृदि विश्वेशं वि

हहि देवमंगलं कृतं अतो न व्यभि
शिष्टाचारानुमितश्रुतेरेव प्रमाण
किंकावगीतशिष्टाचारविषयत्व
लौकिकेति [illegible]
निष्कलंकमेति ॥ जलताडनादे
द्रव्यादिपदार्थानां संग्रहः सं
चेत्यतमाह ॥ बालबोधायेति ॥ बा
बहुश्रुतकेग्रंथेषु सन्नद्धकिमर्थं

- Title – तर्कसंग्रह।
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 1-18
- Lines-
- Size
- Substance Paper –
- Script Devanagari ✓
- Language – संस्कृत
- Period –
- Beginning – ओं श्रीगणेशाय नमः
- End –
- Colophon-
- Illustrations -
- Source -
- Subject - दर्शन
- Revisor -
- Author - अन्नभट्ट।
- Remarks- अपूर्ण

M. Lal

University Haridwar Collection. Digitized by S3 Foundation USA

ॐ श्रीगणेशाय नमः॥ विश्वेश्वरं सांबमूर्तिं प्रणिपत्य गिरं गुरुं॥ टीकां शिशुहितां कुर्वे त
र्कसंग्रहदीपिकां॥१॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमि
तिश्रुतिबोधितकर्तव्यताकमिष्टदेवतानमस्कारं मंगलं शिष्यशिक्षार्थं निबध्नंश्चि
कीर्षितं प्रतिजानीते॥ निधायेति॥ ननु मंगलस्य समाप्तिसाधनत्वं नास्ति मंगले कृते
पि किरणावल्यादौ समाप्त्यदर्शनात्॥ मंगलाभावेपि समाप्तिदर्शनात् अन्वयव्यभि कादंबर्यादौ
चारादिति चेन्न॥ किरणावल्यादौ विघ्नबाहुल्यात् समाप्त्यभावः॥ कादंबर्यादौ ग्रंथा

ॐ निधाय हृदि विश्वेशं विधाय गुरुवंदनं॥ बालानां सुखबोधाय क्रियते तर्क
संग्रहः॥१॥

द्बहिरेव मंगलं कृतमतो न व्यभिचारः॥ ननु मंगलस्य कर्तव्यत्वे किं प्रमाणं॥ इति चेन्न
शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात्॥ तथाहि॥ मंगलं वेदबोधितकर्तव्यताकं अलौ
किकाविगीतशिष्टाचारविषयत्वात्॥ दर्शादिवत्॥ भोजनादौ व्यभिचारवारणाय अ
लौकिकेति॥ रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतेति॥ शिष्टपदं स्पष्टार्थं॥ न कुर्वी
त निष्फलं कर्मेति॥ न तज्जाड्यनादेरपि निषिद्धत्वादिति॥ तर्क्यंते प्रतिपाद्यंते इति तर्का
द्रव्यादिपदार्थास्तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियते इत्यर्थः॥ कस्मै प्रयोजना
येत्यत आह॥ सुखबोधायेति॥ सुखेनानायासेन बोधः पदार्थज्ञानं तस्मै इत्यर्थः॥ ननु
बहुषु तर्कग्रंथेषु सत्सु किमर्थमपूर्वग्रंथः क्रियते इत्यत आह॥ बालानामिति॥ ते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1-17

34 2

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त॰

धामति विघ्नं तत्त्वाद्बालानां बोधो न भवतीत्यर्थः॥ग्रन्थारंभे पद्यदीनः ननु म
नं यद्यः किं कृत्वा किं यतेत्यत आह॥निधायेति॥विश्वेशं जगन्नियंतारं सांबं शिवं हृदि
निधाय निवेश्य स्थाप्य वेत्यर्थः गुरूणां विद्यागुरूणां वंदनं नमस्कारं विधाय कृत्वेत्यर्थः
पदार्थान्विभजते॥द्रव्येति॥पदसमूहार्थः पदार्थः इति व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्य
लक्षणम्॥ ननु विभागादेव सप्तत्वे लब्धे सप्तग्रहणं किमिति चेन्न॥अधिकसंख्याव्यवच्छेदार्थ अर्थ॰
त्वात्॥ननु अतिरिक्तपदार्थप्रमितेर्वा न वा॥नाद्यः प्रमितस्य निषेधायोगात् नांत्यः प्र
तियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न॥पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्य

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः॥तत्र द्रव्याणि पृथिव्यप्तेजो
वाय्वाकाशकालदिगात्ममनांसि नवैव॥२॥

मिति व्यवच्छेदार्थत्वात्॥ननु सप्तान्यतमत्वं
सप्तभिन्नाभिन्नत्वमिति वक्तव्यं॥एवं च सप्तभिन्नस्याप्रसिद्धत्वात् सप्तान्यतमत्वं कथमिति
चेन्न॥द्रव्यादिसप्तान्यतमत्वं च द्रव्यादिभेदसप्तकाभाववत्त्वमित्युक्तत्वात्॥एवमग्रेपि द्रष्ट
व्यं॥द्रव्यं विभजते॥तत्रेति॥तत्र द्रव्यादिमध्ये द्रव्याणि नवैवेत्यन्वयः॥कानि तानि इ
त्यत आह॥पृथिवीत्यादिना॥ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्॥कथं नव द्रव्या
णि॥तथाहि॥नीलं तमश्चलतीत्यबाधितप्रतीतिबलान्नीलरूपाधारतया क्रियाधार
तया च द्रव्यत्वं तावत्सिद्धं॥तच्च तमो नाकाशादिपंचके नभोन्तर्भवति॥रूपवत्त्वात्॥अतएव
न वायौ स्पर्शाभावात् गंधाभावान्न पृथिव्यां॥नापि तेजसि भास्वररूपाभावात् उष्णस्प

3

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त॰टी॰
२

प्रभाभावान्न । नापि जन्यत्वे । नीलरूपवत्त्वेनाभावत्वे नीलरूपाश्रयत्वान्न चापि पृथिव्यां गंधाभावात् स्पर्शरहितत्वा
च्च । तस्मात्तमो दशमद्रव्यमिति चेन्न । तमसो भावरूपत्वात् । तथा हि । तमो हि न स्वतंत्रद्रव्यम् आलो
कासंसर्गकृतचक्षुर्ग्राह्यत्वात् आलोकाभाववत् । रूपिचाक्षुषप्रमायां आलोकस्य कारणत्वा
त् । तस्मात्प्रौढप्रकाशकतेजःसामान्याभावस्तमः । तत्र नीलं तमश्चलतीति प्रत्ययो भ्रमः । अ
तो नव द्रव्याणीति सिद्धं । द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम् । तद्भेदके दश
रूपित्वमव्याप्तिः । पयसोः रूपिलत्वं कालत्वमादोऽनित्यमतिव्याप्तिः । पयसोः स्पर्शवत्त्वं लक्षणमा
श्रावत्तेनमसंभवः । पयसोरेकमपेक्षवत्त्वे । एतद्रूपं जगदर्हितो धर्मी लक्षणं तेन एवासाधारणाय

रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्द
बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः । उत्क्षेपणापक्षेपणा
कुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।
स्तम ।

भेदत्त्वात् लक्षणतावच्छेदकं निरूपयितुं समासारणत्वव्याप्ततें कश्चेष लक्षणत्वे व्याहताव
मिथ्यत्वादेत्वात् निव्याप्ति वारणायतद्भिन्नत्वे धर्मविशेषणं दूषणव्यवहारस्यापि लक्षणप्रयो
जनत्वेन देयं व्याहतेर व्यवहारसाधनत्वात् । ननु गुणवत्त्वं न द्रव्यलक्षणं आद्यक्षण
उत्पन्नविनष्टघटे चाव्याप्तिरिति चेन्न गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विव
त॰ क्षितत्वात् । नन्वेवमपि एकं रूपं रसात्पृथक् इति व्यवहारात् रूपादावतिव्याप्तिरिति चेन्न
एकार्थसमवायादेव तादृशव्यवहारोपपत्तेः । गुणो गुणानवीकारात् गुणविभजते रूपेति
द्रव्यकर्मभिन्नत्वे सति सामान्यवान्गुणः । गुणत्वजातिमान्वा । ननु लघुत्वमृदुत्वकठिन
त्वादीनां विद्यमानत्वात् कथं चतुर्विंशतिर्गुणा इति चेन्न लघुत्वस्य गुरुत्वाभावरूपत्वा

राम
२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नन्वनुगतत्वकठिनत्वयोरवयवसंयोगविशेषरूपत्वात्कर्म विभजते॥ उत्क्षेपणेति॥ संयोगभिन्नत्वे
सति संयोगासमवायिकारणं कर्म। कर्मत्वजातिः॥ भ्रमणरेचनादीनामपि गमनेऽन्तर्भावान्न पंचत्व
विरोधः॥ सामान्यं विभजते॥ परमिति॥ परमधिकदेशवृत्ति अपरं न्यूनदेशवृत्ति सामान्यादिचतुष्टये
जातिर्नास्ति॥ विशेषं विभजते॥ नित्येति॥ पृथिव्यादिचतुष्टयस्य परमाणवः आकाशादिपंच
कं नित्यद्रव्याणि॥ समवायस्य भेदो नास्तीत्याह॥ समवायस्त्वेक इति॥ अभावं विभजते प्रागभाव इ
ति॥ तत्र उद्देशक्रमानुसारात् प्रथमं पृथिव्या लक्षणमाह॥ गंधवतीति॥ नाम्ना पदार्थसंकीर्तन
मुद्देशः॥ उद्देशक्रमेणैव सर्वे अद्येवमिणामिकान्॥ ननु हेरम्भारम्भवयवारब्धे द्रव्ये परस्पर

परमपरं चेति द्विविधं सामान्यं॥ नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव॥ समवायस्त्वेक एव
अभावश्चतुर्विधः॥ प्रागभावः प्रध्वंसाभावोऽत्यंताभावोऽन्योन्याभावश्चेति॥ गंधवती पृथ्वी॥ सा
द्विविधा॥ नित्याऽनित्या च॥ नित्या परमाणुरूपा॥ अनित्या कार्यरूपा॥ पुनस्त्रिविधा॥ श

विरोधेन गंधानुत्पादकत्वादत्यादि॥ न च तत्र गंधप्रतीत्यनुपपत्तिरिति वाच्यम्॥ अवयवा
वगंधस्यैव प्रतीतिसंभवेन चित्रगंधानंगीकारात्॥ किंच उत्पन्नविनष्टघटादावव्याप्ति
रिति चेन्न॥ गंधसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षितत्वात्॥ ननु जलादा
वपि गंधप्रतीतेरतिव्याप्तिरिति चेन्न॥ अन्वयव्यतिरेकाभ्यां पृथिवीगंधस्यैव तत्र भानांगी
कारात्॥ ननु तथापि कालस्य सर्वाधारतया सर्वेषां लक्षणानां कालेऽतिव्याप्तिरिति चेत्
न सर्वाधारताप्रयोजकसंबंधभिन्नसंबंधेन लक्षणस्य विवक्षितत्वात्॥ पृथिवीवि

पृथिवीसंबंधस्तेन गंधप्रतीतिरिति चेत् पृथिवीसंबंधाभावे
गंधप्रतीत्यभावप्रसंगादिति

गा॰ तर्कसंग्रहटीका ६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त.टी.
२

भजते सा द्विविधेति नित्येति ध्वंसाप्रतियोगित्वं नित्यत्वं ध्वंसप्रतियोगित्वमनित्यत्वं पु
नस्तां विभजते अनित्येति आत्मनो भोगायतनं शरीरं यदवच्छिन्नात्मनि भोगो जायते तद्भो
गायतनं सुखदुःखसाक्षात्कारो भोगः शरीरजन्यविशेषगुणानाश्रयत्वे सति ज्ञानका
रणमनःसंयोगाश्रयत्वमिंद्रियत्वं शरीरेंद्रियभिन्नो विषयः एवं च गंधवच्छरीरं
पार्थिवशरीरं गंधवदिंद्रियं पार्थिवेंद्रियं गंधवान्विषय इति तल्लक्षणं बोध्यं पार्थिव
शरीरं दर्शयति शरीरमिति इंद्रियं दर्शयति इंद्रियमिति गंधग्राहकमिति प्रयोज
नेंद्रियविषयभेदात् शरीरमस्मदादीनां इंद्रियं गंधग्राहकं घ्राणं नासिकाग्रवर्ति
विषयो मृत्पाषाणादिः शीतस्पर्शवत्य आपः ता अपि द्विविधा नित्या अनित्याश्च नित्याः
परमाणुरूपाः अनित्याः कार्यरूपाः पुनस्त्रिविधा शरीरेंद्रियविषयभेदात् शरीर
नकथनं घ्राणमिति संज्ञा नासाग्रस्थत्वद्योतितः एवमुत्तरत्रेयं पार्थिवं विषयं
दर्शयति मृत्पाषाणेति अपां लक्षणमाह शीतेति उष्णजलेऽव्याप्तिवा
रणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्वं तात्पर्यं शीतं शिलातलमि
त्यादौ जलसंबंधाद्वस्तुतः स्पर्शभानमिति नातिव्याप्तिः अग्रे सर्वत्र एवं रीत्या व्याख्ये
यं तेजसो लक्षणमाह उष्णस्पर्शवदिति उष्णजलक्षितिप्रतीतेः तेजःसंबंधान्वि
धायित्वान्नातिव्याप्तिः विषयं विभजते भौमेति ननु सुवर्णं पार्थिवमेव पीतत्वाद्गु
रुत्वाच्च हरिद्रादिवदिति चेन्न अत्यंतानलसंयोगे सति घृतादौ द्रवत्वनाश

राम
२

दर्शनेन जलमध्यस्य घृतेनाशुमदर्शनेनास्मति प्रतिबंधके पार्थिवद्रव्यत्वनाशाग्निसंयोग
योः कार्यकारणभावावधारणात् ॥ रसवत्स्पर्शवत्त्वे नानलसंयोगमहति ॐ वह्निद्रवमानद्र
वत्वाधिकरणत्वे न पार्थिवत्वानुपपत्तेः ॥ तस्मात्पीतद्रव्यद्रवत्वनाशप्रतिबंधकतया द्रव
द्रव्यांतरसिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः ॥ रूपं च तयावायवादि
पृथ्वत तत्मौवात्तेजलत्वसिद्धिः ॥ तस्य उष्णस्पर्शभास्वररूपयोगः रूपमेकं पार्थिवरूप
स्पर्शाभ्यां प्रतिबंधाद नवभासेत्सिद्धौ ॥ तस्मात्स्पर्श तेजोत्वेन सिद्धिः वायु तेजस्यति ॥ रूपरहितत्व
ति ॥ आकाशगुणः द्रवति व्याप्तिवारणाय स्पर्शवानिति ॥ शेषव्यावृत्ति व्याप्तिवारणाय

वकरणलौके इंद्रियरसग्राहकं रसनं जिह्वाग्रवर्ति ॥ विषयस्तोत्र समुद्रादिः ॥ उष्ण
स्पर्शवत्तेजः ॥ तद्द्विविधं ॥ नित्यमनित्यं च नित्यं परमाणुरूपं अनित्यं कार्यरूपं
पुनस्त्रिविधं ॥ शरीरेंद्रियविषयभेदात् ॥ शरीरमादित्यलोके ॥ इंद्रियं रूपग्राहकं चक्षुः ॥

परं हतं ॥ इति ॥ न तु प्राणस्य कुंजेन्तरभावस्तत्वगम्याह ॥ शरीरेति ॥ स चेति ॥ एक एव प्राण
स्यान भेदात्तु प्राणापानादिशब्दैः व्यवह्रियत इति भावः ॥ स्पर्शानुमेयो वायुः ॥ त
र्थाहि ॥ योयं वायो वाति स्तति ॥ अनुष्णाशीतस्पर्शो भासमानस्पर्शः क्वचिदाश्रितः गुण
त्वाद्रूपवत् ॥ न चास्य पृथ्वी आश्रयः ॥ उद्भूतस्पर्शवत्पार्थिवस्योद्भूतरूपवत्त्वनियमा
त् ॥ न जलतेजसी ॥ अनुष्णाशीतत्वात् ॥ नापि मनश्चतुष्टयं सर्वेणोपलब्धेः ॥ प्रसंगात् ॥ नम
नः परमाणुस्पर्शस्यातीन्द्रियत्वात् ॥ तस्मात्च प्रतीयमानस्पर्शाश्रयः स वायुः ॥ नन्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

3
त॰दी॰
4

वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटवदिति नवीनाः उद्भूतरूपवत्त्वस्योपाधित्वात् यत्र द्र
व्यत्वे सति बहिरिन्द्रियजन्यप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति साध्यव्यापकत्वं पक्षे साधन
व्यापकत्वं भवति न चैवं तप्तवारिस्थतेजसो प्रत्यक्षत्वापत्तिः इष्टत्वात् तस्माद्रूपरहि
तत्वाद्वायुरप्रत्यक्षः इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिनाशक्रमः कथ्यते
ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते ततः परमाणुद्वयसंयोगे सति द्व्यणु
कमुत्पद्यते त्रिभिर्द्व्यणुकैस्त्र्यणुकं एवं चतुरणुकादिक्रमेण महापृथिवी महत्यआ

कृष्णताराग्रवर्ति विषयश्चतुर्विधः भौमदिव्यौदर्याकरजभेदात् भौमं वह्न्यादि
कं अबिन्धनं विद्युतादि भुक्तान्नपरिणामहेतुरौदर्यं आकरजं सुवर्णादि रूपर
हितस्पर्शवान्वायुः स द्विविधः नित्योऽनित्यश्च नित्यः परमाणुरूपः अनित्यः
कार्यरूपः पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् शरीरं वायुलोके

पः महत्तेजो महान्वायुरुत्पद्यते एवमुत्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात् क्रियया
परमाणुद्वयविभागे सति द्व्यणुकनाशः ततस्त्र्यणुकस्य ततश्चतुरणुकस्य एवं पृथि
व्यादिनाशः असमवायिकारणनाशाद्द्व्यणुकनाशः समवायिकारणनाशात् त्र्यणुक १
नाश इति संप्रदायः जालसूर्यमरीचिस्थं सर्वत्र समवायिकारणनाशाद्द्रव्यनाशः
इति नवीनाः किं पुनः परमाणुसद्भावे प्रमाणं उच्यते सूक्ष्मतमं यद्दृश्यते त
त्सावयवं चाक्षुषद्रव्यत्वात् घटवत् त्र्यणुकावयवोऽपि सावयवः महदारम्भक

जालसूर्यमरीचिस्थं

राम
4

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न

त्वात्॥ तंतुवत्॥ तेषां एककार्याश्रयत्व॥ तत्त्वपरमाणवः सर्वनित्याः॥ कार्यत्वेऽनवस्थाप्रसंगात्॥ तच्च
महत्त्वे प्रयोजकं चित्वरूपमाणपरिमाणद्विविधस्थितिप्रचयसंज्ञा ... प्रमाणं॥ घातायद्यापूर्वमक
ल्पनं॥ इत्यादि॥ अतिरेकप्रमाणं सर्वकार्यद्रव्यध्वंसोऽवान्तरप्रलयः॥ सर्वभावकार्यध्वंसो महा
प्रलय इति विवेकः॥ आकाशोऽनन्तयत्नसाध्य ... इति॥ नन्वाकाशादिकं पृथिव्यादिवन्ना
नानेत्यत आह॥ तच्चैकमिति॥ भेदे प्रमाणाभावादित्यर्थः॥ एकत्वादेव सर्वत्र शब्दोपलब्धेर्विभुत्वमेकै
त्वमित्याह॥ विभ्विति॥ सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं॥ शब्दोऽमूर्तत्वं परिच्छिन्नपरिमाणवत्त्वं क्रियावत्त्वं
वा विभुत्वादेव आत्मवत्॥ नित्यमित्याह॥ नित्यं चेति॥ कालं लक्षयति॥ अतीतादीति॥ सर्वाधारः॥ कालः सर्व
इंद्रियं त्वक् स्पर्शग्राहकं त्वक् सर्वशरीरवर्त्ति॥ विषयो स्पर्शादिकं पवनहेतुः॥ शरीरान्तः संचारी वायुः प्रा
णः॥ स एकोऽपि उपाधिभेदात् प्राणापानादिसंज्ञां लभते॥ शब्दगुणमाकाशं॥ तच्चैकं विभु नित्यं च॥ अ
तीतादिव्यवहारहेतुः कालः॥ स चैको नित्यो विभुश्च॥ प्राच्यादिव्यवहारहेतुर्दिक्॥ सा चैका नि
त्या विभ्वी च॥ ज्ञानाधिकरणमात्मा॥ स द्विविधः॥ परमात्मा जीवात्मा चेति॥ तत्रेश्वरः सर्वज्ञः पर
कार्यनिमित्तकारणं च दिशं लक्षयति॥ प्राच्यादीति॥ दिशोऽपि कार्यमात्रे निमित्तकारणत्वं॥ आत्मान
लक्षयति॥ ज्ञानेति॥ आत्मानं विभजते॥ स द्विविध इति॥ परमात्मानं लक्षयति॥ तत्रेति॥ नित्यज्ञा
नाधिकरणत्वमीश्वरत्वं॥ ननु ईश्वरसत्त्वे किं प्रमाणं न तावत्प्रत्यक्षं तद्धि बाह्यमान्तरं वा नाद्यः॥ अ
रूपद्रव्यत्वात्॥ नान्त्यः॥ आत्मसुखादिव्यतिरिक्तत्वात्॥ नाप्यनुमानं लिंगाभावादिति चेन्न॥ क्षित्यंकु
रादिकं सकर्तृजन्यं कार्यत्वात्॥ घटवदित्यनुमानस्य प्रमाणत्वात्॥ उपादानगोचरापरोक्षज्ञानचि
कीर्षाकृतिमत्त्वं कर्तृत्वं॥ उपादानं समवायिकारणं सकलपरमाण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वं॥

सर्वज्ञः सप्त ... ज्ञानाधिकरणमात्मा ... १०

5
त॰टी॰
5

जीवस्य लक्षणमाह जीवइति सुखाद्याश्रयत्वं जीवलक्षणं ननु मनुष्योहं ब्राह्मणोहमित्यादौ सर्वत्र अहंप्रत्य
येशरीरस्यैव विषयत्वात् शरीरमेवात्मेति चेन्न शरीरस्यात्मत्वे करपादादिनाशे शरीरनाशात् आत्मनोपिना
शप्रसंगात् नापि इंद्रियाणामात्मत्वं योहं घटमद्राक्षं सोहमिदानीं स्पृशामीत्यनुसंधानाभावप्रसंगा
त् अन्यानुभूते अन्यस्यानुसंधानाभावात् तस्माद्देहेंद्रियव्यतिरिक्तो जीवः सुखदुःखादिवैचि
त्र्यात्प्रतिशरीरं भिन्नः स च न परमाणुः शरीरव्यापिसुखाद्यनुपलब्धिप्रसंगात् न मध्यमपरिमाणः
तथासत्यनित्यत्वप्रसंगेन कृतहानाकृताभ्यागमप्रसंगात् तस्मान्नित्यो विभुर्जीवः मनसो लक्ष

जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च सुखाद्युपलब्धिसाधनमिंद्रियं मनः तच्च प्रत्यात्म
नियतत्वादनंतं परमाणुरूपं नित्यं च चक्षुर्मात्रग्राह्यो गुणो रूपं तच्च शुक्लनीलपीतहरितक
पिशरक्तचित्रभेदात्सप्तविधं पृथिवीजलतेजोवृत्ति तत्र पृथिव्यां सप्तविधं अभास्वरशु
क्लं जले भास्वरशुक्लं तेजसि रसनग्राह्यो गुणो रसः ॥ ॥

णमाह सुखेति स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणं मनो विभजते तच्चेति एकैकस्यात्म
न एकैकं मनः इत्यात्मनामनेकत्वान्मनसामप्यनेकत्वमित्यर्थः परमाणुरूपमिति मध्यमपरिमाणत्वेऽ
नित्यत्वप्रसंगात् इत्यर्थः ननु मनो विभु स्पर्शरहितद्रव्यत्वात् आकाशादिवदिति चेन्न मनसो विभु
त्वे आत्ममनःसंयोगस्यासमवायिकारणस्याभावात् ज्ञानानुत्पत्तिप्रसंगात् न च विभुद्वयसंयोगो
स्त्विति वाच्यं तत्संयोगनित्यत्वेन सुषुप्त्यभावप्रसंगात् पुरीतद्व्यतिरिक्तप्रदेशे आत्ममनःसंयोगस्य
सर्वदा विद्यमानत्वात् अणुत्वे तु यदा मनः पुरीततिं प्रविशति तदा सुषुप्तिः यदा निःसरति तदा ज्ञा
नोत्पत्तिरित्यणुत्वसिद्धिः रूपं लक्षयति चक्षुरिति संख्यादावतिव्याप्तिवारणाय मात्रपदं
रूपत्वे अतिव्याप्तिवारणाय गुणपदं प्रभायां चक्षुःसंयोगे अतिव्याप्तिवारणाय विशेष्यपदं देयं ननु

राम॰ 5

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रसं लक्षयति॥ रसनेति॥ रसत्वेऽतिव्याप्तिवारणाय गुणपदं॥ रसस्याश्रयमाह इत्यर्थ इति॥ आश्रयं विभज्य
दर्शयति॥ पृथिव्यामिति॥ गंधं लक्षयति॥ घ्राणेति॥ गंधत्वेऽतिव्याप्तिवारणाय गुणपदं॥ स्पर्शं लक्षयति॥
त्वगिति॥ स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदं॥ संयोगादावतिव्याप्तिवारणाय मात्रपदं॥ पाकजमिति
पाकजमिति॥ पाकस्तेजः संयोगस्तेन पूर्वरूपं नश्यति रूपान्तरमुत्पद्यत इत्यर्थः॥ अत्र परमाणुष्वेव पा-
को न द्व्यणुकादौ॥ आमघटे निक्षिप्ते परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकादि
क्रमेण रक्तघटोत्पत्तिः॥ न च परमाणौ समवायिकारणं तेजःसंयोगः असमवायिकारणं अदृष्टा-
दिकं निमित्तकारणं द्व्यणुकादिरूपे कारणरूपमसमवायिकारणं इति पीलुपाकवादिनो वैशेषिकाः॥

रसश्च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः॥ पृथिवीजलवृत्तिः॥ तत्र पृथिव्यां षड्विधः॥
जले मधुर एव॥ घ्राणग्राह्यो गुणो गन्धः॥ स द्विविधः सुरभिरसुरभिश्च॥ पृथिवीमात्रवृत्तिः॥ त्वगिन्द्रि-
यमात्रग्राह्यो गुणः स्पर्शः॥ स त्रिविधः शीतोष्णानुष्णाशीतभेदात्॥ पृथिव्यप्तेजोवायुवृत्तिः॥
तत्र शीतो जले उष्णस्तेजसि अनुष्णाशीतः पृथिवीवाय्वोः॥ रूपादिचतुष्टयं पृथिव्यां पाक-
जमनित्यं च॥ नित्यगतं नित्यमनित्यगतमनित्यं च॥ एकादिव्यवहारहेतुः संख्या॥ नवद्रव्यवृ-
त्तिः एकत्वादिपरार्धपर्यन्ता॥ एकत्वं नित्यगतं नित्यं॥ द्वित्वादिकं सर्वत्राप्यनित्यमेव॥ ॥

शिकाः पूर्वघटस्य नाशं विनैव अवयविन्यवयवेषु परमाणुपर्यन्तेषु युगपद्रूपान्तरोत्पत्तिरिति पि-
ठरपाकवादिनो नैयायिकाः॥ अत एव पार्थिवपरमाणुषु रूपादिकमनित्यमित्यर्थः॥ अन्यत्र जलादावि-
त्यर्थः॥ नित्यगतमिति॥ परमाणुगतमित्यर्थः॥ अनित्यगतमिति॥ द्व्यणुकादिनिष्ठमित्यर्थः॥ रूपादिच-
तुष्टयमुद्भूतं प्रत्यक्षं॥ उद्भूतत्वं प्रत्यक्षप्रयोजको धर्मः॥ तदभावस्त्वनुद्भूतत्वं॥ संख्यां लक्षयति॥ एकेति॥
परिमाणं लक्षयति॥ मानेति॥ परिमाणं विभजते॥ तच्चेति॥ भावप्रधानो निर्देशः॥ अणुत्वं महत्त्वं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पृथक्त्वं लक्षयति पृथगिति इदमस्मात् पृथगिति व्यवहारकारणमित्यर्थः संयोगं लक्षयति संयुक्तेति
इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थः रूपादिलक्षणेषु सर्वत्र दिक्कालादावतिव्याप्तिवारणाय असा
धारणेति पदं देयं संयोगो द्विविधः कर्मजः संयोगजश्च आद्यो हस्तक्रियया पुस्तकसंयोगः
द्वितीयो हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः अव्याप्यवृत्तिः संयोगः स्वात्यन्ताभावसमा
नाधिकरणत्वमव्याप्यवृत्तित्वं विभागं लक्षयति संयोगेति कालादावतिव्याप्तिवारणाय गुणपदं व्याप्ति
रूपादावतिव्याप्तिवारणाय संयोगविनाशक इति विभागोपि कर्मजो विभागजश्च आद्यो हस्तपुस्तक
मानव्यवहारासाधारणं कारणं परिमाणं नवद्रव्यवृत्तिः तच्चतुर्विधं अणुमहद्दीर्घह्रस्वं चेत्य
र्थः पृथग्व्यवहारासाधारणं पृथक्त्वम् सर्वद्रव्यवृत्तिः संयुक्तव्यवहारहेतुः संयोगः सर्वद्र
व्यवृत्तिः संयोगनाशको गुणो विभागः सर्वद्रव्यवृत्तिः परापरव्यवहारासाधारणकारणे प
रत्वापरत्वे ते द्विविधे दिक्कृते कालकृते चेति दूरस्थे दिक्कृतं परत्वं समीपस्थे दिक्कृतमप
ज्येष्ठे कालकृतं परत्वं कनिष्ठे कालकृतमपरत्वं आकाशपतनासमवायिकारणं गुरुत्वं पृथ्वीजलवृत्तिः

विभागः परत्वापरत्वयोर्लक्षणमाह परापरेति परव्यवहारकारणं परत्वं अपरव्यवहारकार
णमपरत्वमित्यर्थः विभजते ते द्विविधे इति दिक्कृतमुदाहरणमाह दूरस्थेति कालकृ
तमुदाहरणमाह ज्येष्ठेति गुरुत्वं लक्षयति आद्येति द्वितीयादिपतनस्य वेगोऽसमवायिका
रणत्वात् वेगेऽतिव्याप्तिवारणाय आद्येति द्रवत्वं लक्षयति स्यन्दनेति स्यन्दनं प्रवणं तच्च
संयोगजन्यं नैमित्तिकं [illegible] तद्विलक्षणं सांसिद्धिकं पृथिव्यां नैमित्तिकमुदाहरति घृता
दाविति तेजसीत्याह सुवर्णादाविति स्नेहं लक्षयति ॥ ॥ ॥ ॥ ॥ ॥

द्वितीयो कायपुस्तकविभागः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वृत्तीति । कालादावतिव्याप्तिवारणाय गुणेति । रूपादावतिव्याप्तिवारणाय पिंडीभावेति । शब्दं
लक्षयति । श्रोत्रेति । शब्दत्वेऽतिव्याप्तिवारणाय गुणेति । रूपादावतिव्याप्तिवारणाय श्रोत्रेति । शब्दं
विभजते । ध्वन्यात्मक इति । शब्दो द्विविधः । संयोगजो विभागजः शब्दजश्चेति । तत्राद्यो भेरी
दण्डसंयोगजन्यः । द्वितीयो वंशे पाट्यमाने दलद्वयविभागजश्चटचटाशब्दः । एवं भेर्या
दिदेशमारभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दाः शब्दजाः । ध्वन्यात्मको वर्णात्मकश्चेति । ध्व
न्यात्मकं वर्णलक्षणमाह सर्वेति । कालादावतिव्याप्तिवारणाय ज्ञानमिति । रूपादावतिव्याप्ति
वारणाय सर्वव्यवहारेति । बुद्धिरिति । जानामीत्यनुव्यवसायगम्यज्ञानत्वमेव लक्षणम् ।

स्यन्दनासमवायिकारणं द्रवत्वं । पृथिव्यप्तेजोवृत्ति ॥ तद्द्विविधं सांसिद्धिकं नैमि
त्तिकं च । सांसिद्धिकं जले । नैमित्तिकं पृथ्वीतेजसोः ॥ पृथिव्यां घृतादावग्निसंयोगजं
द्रवत्वं । तेजसि सुवर्णादौ । चूर्णादिपिंडीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ॥ श्रोत्र
ग्राह्यो गुणः शब्दः आकाशमात्रवृत्तिः । स द्विविधः ॥ ध्वन्यात्मको वर्णात्मकश्चेति ।
ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ॥ सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः ॥
सा द्विविधा स्मृतिरनुभवश्च । संस्कारजन्यं ज्ञानं स्मृतिः । तद्भिन्नं ज्ञानमनुभवः ॥

मित्यर्थः । बुद्धिं विभजते सेति । स्मृतेर्लक्षणमाह संस्कारेति । भावनाख्यः संस्कारः ॥
संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति ॥ घटादावतिव्याप्तिवारणाय संस्का
रजन्यमिति । अनुभवं लक्षयति तद्भिन्नमिति । स्मृतिभिन्नं ज्ञानमनुभव इत्यर्थः । अ

13

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त.टी. ५

तत्संबंधज्ञानस्य विवक्षितत्वात् संयोगाभावावच्छेदेन ५५

सा द्विविधा इति यथार्थानुभवस्य लक्षणमाह तद्वतीति ननु घटे घटत्वप्रमायामव्याप्तिः
घटत्वे घटाभावादिति चेन्न यत्र यत्संबंधोऽस्ति तत्र तत्संबंधानुभव इत्यर्थः घटत्वे घटसंबंधोऽस्ती
ति नाव्याप्तिः सैवेति यथार्थानुभव एव शास्त्रे प्रमेत्युच्यते अयथार्थं तदभावति
तद्भाववतीति ननु इदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न यदवच्छेदेन संयोगाभावस्त
दवच्छेदेन संयोगज्ञानस्य भ्रमत्वात् संयोगावच्छेदेन संयोगसंबंधस्य सत्त्वान्नातिव्याप्तिः य

स द्विविधः यथार्थोऽयथार्थश्च तद्वति तत्प्रकारकोऽनुभवो यथार्थः सैव प्रमेत्युच्य
ते तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमि
त्युपमितिशाब्दभेदात् तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदा
त् असाधारणं कारणं करणं अनन्यथासिद्धिकार्यनियतपूर्ववृत्तिकारणं

थार्थानुभवं विभजते यथार्थेति प्रसंगात्प्रमाकरणं विभजते तत्करणमिति प्रमा
करणमित्यर्थः प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणं करणलक्षणमाह
असाधारणमिति साधारणकारणदिक्कालादिव्यावारणाय असाधारणेति
कारणलक्षणमाह कार्येति पूर्ववृत्तिकारणमित्युक्ते रासभादावतिव्याप्तिः स्यादतो
नियतेति तावन्मात्रे कृते कार्येऽतिव्याप्तिरतः पूर्ववृत्तिः ननु तंतुरूपमपि पटं
प्रति कारणं स्यादिति चेन्न अनन्यथासिद्धेति विशेषणात् अन्यथासिद्धत्व
अन्यथासिद्धिविरहः अन्यथासिद्धिस्त्रिविधा येन सहैव यस्य यं प्रति पूर्ववृत्ति
त्वं

14

राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तन्नेनान्यथासिद्धं यथा तंतुकाले तद्रूपं तंतुत्वं च पटं प्रति ॥ अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते ॥
मवगम्यते तं प्रति तदन्यथासिद्धं यथा आकाशं प्रति पूर्ववृत्तित्वे ज्ञाते ॥ एव पटं प्रत्याकाशस्य
अन्यत्र क्लृप्तनियतपूर्ववृत्तिन एव कार्यसंभवे तत्सहभूतमन्यथासिद्धं यथा पाकजस्थले
गंधं प्रति रूपप्रागभावस्य ॥ एवं चानन्यथासिद्धनियतपूर्ववृत्तित्वं ॥ कार्यलक्षण
माह ॥ कार्यमिति ॥ कारणं विभजते ॥ कारणमिति ॥ समवायिकारणमाह ॥ यत्समवेते
ति ॥ यस्मिन्समवेतेत्यर्थः ॥ असमवायिकारणं लक्षयति ॥ कार्येणेत्युदाहरति ॥ तंतु
संयोग इति ॥ कार्येण पटेन सहैकस्मिंस्तंतौ समवेतत्वात् ॥ तंतुसंयोगः पटस्यासम

कार्यं प्रागभावप्रतियोगि ॥ कारणं त्रिविधं ॥ समवाय्यसमवायिनिमित्तभेदात् ॥ यत्स
मवेतं कार्यमुत्पद्यते तत्समवायिकारणं ॥ यथा तंतवः पटस्य ॥ पटश्च स्वगतरूपा
देः ॥ कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति कारणमसमवायिकारणं ॥
यथा तंतुसंयोगः पटस्य ॥ तंतुरूपं पटरूपस्य ॥ तदुभयभिन्नं कारणं निमित्तकार
णं ॥ यथा तुरीवेमादिकं पटस्य ॥ तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणं

वायिकारणमित्यर्थः ॥ कारणेन सहेत्युदाहरति ॥ तंतुरूपमिति ॥ कारणेन पटे
न सह एकस्मिंस्तंतौ समवेतत्वात् ॥ तंतुरूपं पटरूपस्यासमवायिकारणमित्यर्थः
निमित्तकारणं लक्षयति ॥ तदुभयेति ॥ समवाय्यसमवायिभिन्नं कारणमित्यर्थः ॥
कारणलक्षणमुपसंहरति ॥ तदेतदिति ॥ प्रत्यक्षलक्षणमाह ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

६
त॰टी॰
८

16

तत्रेति प्रमाणचतुष्टयमध्ये इत्यर्थः प्रत्यक्षज्ञानस्य लक्षणमाह इन्द्रियमिति इन्द्रियं चक्षुरादिकं अर्थो घटादिः तयोः सन्निकर्षः संयोगादिः तज्जन्यं ज्ञानमित्यर्थः तद्द्विविधम् निर्विकल्पकस्य लक्षणमाह निष्प्रकारकमिति विशेषणविशेष्यसम्बन्धानवगाहिज्ञानमित्यर्थः ननु निर्विकल्पके किं प्रमाणम् इति चेन्न गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीति ज्ञानवत् इत्यनुमानस्य प्रमाणत्वात् विशेषणज्ञानस्यापि सविकल्पकत्वे अनवस्थाप्रसंगात् निर्विकल्पकसिद्धिः सविकल्पकलक्षणमाह सप्रकारकमिति नाम

करणं तत्र साक्षात्कारज्ञानं प्रत्यक्षं इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं तद्द्विविधम्
निर्विकल्पकं सविकल्पकं चेति तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् सप्रका
यथा रकं सविकल्पकं डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति प्रत्यक्षज्ञानहेतुरि
न्द्रियार्थः सन्निकर्षः षड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवा
यः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति चक्षुषा घटप्रत्यक्ष

जात्यादिविशिष्टतया विशेष्यावगाहि ज्ञानमित्यर्थः सविकल्पकमुदाहरति यथेति इन्द्रियार्थसन्निकर्षं विभजते प्रत्यक्षेति संयोगसन्निकर्षमुदाहरति चक्षुषेति द्रव्यप्रत्यक्षे म वेत्यसंयोगसन्निकर्षः इत्यर्थः आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षज्ञानमुत्पद्यते संयुक्तसमवायमुदाहरति घटरूपेति तत्र संयुक्तमाह चक्षुःसंयुक्तेति संयुक्तसमवेतसमवायमुदाहरति रूपत्वेति समवायमुदाहरति श्रोत्रेणेति तदुपपा

१

राम
८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

करणेति। ननु रूपस्य प्रत्यक्षस्य कथं श्रोत्रसंबंधेऽपि इति चेन्न। वीचीतरंगन्यायेन कदंबमुकुलन्या
येन वा शब्दान्तरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य श्रोत्रसंबंधात्तस्य संभवात्। समवेतसमवा
यमुदाहरति। शब्दत्वेति। विशेषणविशेष्यभावमुदाहरति। अभावेति। तदुपपादयति
घटाभाववद्भूतलमित्यत्र। घटो नास्तीत्यत्र घटाभावस्य विशेष्यत्वं द्रष्टव्यम्। एतेन अनुपल
ब्धेः प्रमाणान्तरत्वं निरस्तम्। यत्र घटोऽभविष्यत्तर्हि भूतलमिवाद्रक्ष्यत दर्शनाभावान्नास्तीति
तर्कितप्रतियोगिसत्त्वविरोध्यनुपलब्धिसहकृतेनेन्द्रियेणैवाभावज्ञानोपपत्तौ अनुपा

घटरूपप्रत्यक्षे संयुक्तसमवायः। चक्षुःसंयुक्ते घटे रूपस्य समवायात्। रूपत्वसामान्य
प्रत्यक्षे संयुक्तसमवेतसमवायः। चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य
समवायात्। श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवर्त्याकाश
स्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात्। शब्दत्वसाक्षात्
कारे समवेतसमवायः। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। अभावप्रत्यक्षे विशे
षणविशेष्यभावः सन्निकर्षः। घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभा
वस्य विशेषणत्वात्। एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं तस्मादिन्द्रियं प्र
लब्धेः प्रमाणान्तरत्वाभावात्। इन्द्रियकरणत्वानार्थमपेक्ष्य तत्तदिन्द्रियस्यैव करणोपपत्तौ
ग्रनुपलब्धेः करणत्वस्याप्युक्तत्वात्। ननु विशेषणविशेष्यभावस्य सन्निकर्षस्य संबंधवत्
णाभावात्कथं संबंधत्वमिति चेन्न। विशेष्यताविशेषणताविशेषभावस्य विशेष्यस्वरूपमेव
नातिरिक्तः संबंधः प्रतीतावतः सम्प्रेहरन् तस्मात्करणमाह एवमिति। असाधारणकारणत्वा

17

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अनुमानं लक्षयति अनुमितिकरणमिति अनुमितेर्लक्षणमाह परामर्शेति ननु संशयोत्त
रप्रत्यक्षेऽतिव्याप्तिः स्थाणुपुरुषसंदेहानन्तरं पुरुषत्वव्याप्यकरादिमानमिति परामर्शे स
ति पुरुष एवेति प्रत्यक्षजननात् न च तत्रानुमितिरेवेति वाच्यं पुरुषं साक्षात्करोमीत्यनु
व्यवसायविरोधादिति चेन्न पक्षतासहकृतपरामर्शजन्यस्य विवक्षितत्वात् सिषाधयि
षाविरहविशिष्टसिद्ध्यभावः पक्षता साध्यसिद्धिरनुमितिप्रतिबंधिका सिद्धसत्त्वेपि अनुमिनो

अनुमितिकरणमनुमानं परामर्शजन्यं ज्ञानमनुमितिः व्याप्तिविशिष्टपक्षधर्मताज्ञानं परा
मर्शः यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः तज्जन्यं पर्वतो वह्निमान
िति ज्ञानमनुमितिः यत्र धूमस्तत्र वह्निरिति साहचर्यनियमो व्याप्तिः व्याप्यस्य पर्वतादि
वृत्तित्वं पक्षधर्मता अनुमानं द्विविधम् स्वार्थं परार्थं च स्वार्थं स्वानुमितिहेतुः तथा
हि स्वयमेव भूयो दर्शनेन यत्र धूमस्तत्र वह्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं
गत्वा तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति

मीतीच्छायामनुमितिदर्शनात् सिषाधयिषा उत्तेजिका ततश्चोत्तेजकाभावविशिष्टम
ण्यभावस्य दाहकारणत्ववत् सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यापि अनुमितिकार
णत्वं परामर्शं लक्षयति व्याप्तीति व्याप्तिविशिष्टविषयकं यत्पक्षधर्मताज्ञानं स परामर्श इत्यर्थः
परामर्शमभिनीय दर्शयति यथेति अनुमितिमभिनीयति तज्जन्यमिति परामर्शजन्य
त्वमित्यर्थः व्याप्तेर्लक्षणमाह यत्र धूम इति व्याप्तेरभिनयः साहचर्यनियम इति
नरणं साहचर्यं सामानाधिकरण्यं तस्य नियमः हेतुसामानाधिकरण्यात्यन्ताभावप्रतियो

रामः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्रहणं सहचारदर्शनेऽपि हीरकेऽव्यभिचारोपलब्धेरभयोर्दर्शनेन कथं व्याप्तिग्रह इति चेन्न। व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात्। व्यभिचारज्ञानं निश्चयरूपं शंकारूपं च। तद्विरहः क्वचित्तर्कात्। क्वचित्स्वतःसिद्ध एव। धूमाग्निव्याप्तौ हि कार्यकारणभावभंगप्रसंगलक्षणस्तर्कोऽव्यभिचारशंकानिवर्तकः। ननु पाकस्थवह्निधूमयोः सहदर्शने कथं व्याप्तिग्रह इति चेन्न। धूमत्ववह्नित्वरूपसामान्यलक्षणप्रत्यासत्त्या सकलधूमवह्निज्ञानसंभवात्। तस्मादिति। लिंगपरामर्शादित्यर्थः। परार्थानुमानमाह। यत्त्विति। यच्छब्दस्य तत्परार्थानुमान-

यत्र धूमस्तत्र वह्निरिति लिंगदर्शनेतरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिंगपरामर्श इत्युच्यते। तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानं। यत्तु स्वयमेव धूमादग्निमनुमाय परं प्रति बोधयितुं पंचावयववाक्यं प्रयुंक्ते तत्परार्थानुमानं। यथा पर्वतो वह्निमान् धूमवत्त्वात्। यो यो धूमवान् स सोऽग्निमान्। यथा महानसं। तथा चायं। तस्मात्तथेति। अनेन प्रतिपादितात् लिंगात्परोऽप्यग्निं प्रतिपद्यते। प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पंचावयवाः॥ २४

मितितच्छब्देनान्वयः। पंचावयववाक्यमुदाहरति। यथेति। अवयवस्वरूपमाह। प्रतिज्ञेति। उदाहृतवाक्ये प्रतिज्ञाविभागमाह। पर्वतो वह्निमानिति। साध्यवत्तया पक्षवचनं प्रतिज्ञा। पंचम्यन्तं लिंगप्रतिपादकं हेतुः। व्याप्तिप्रतिपादकमुदाहरणं। पक्षधर्मताज्ञानार्थमुपनयः। हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनं। पक्षज्ञानं प्रतिज्ञाप्रयोजनं। लिंगज्ञानं हेतुप्रयोजनं। व्याप्तिज्ञानमुदाहरणप्रयोजनं। पक्षधर्मताज्ञानमुपनयप्र-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वार्थेति ननु व्याप्तिस्मरणपदार्थज्ञानाभ्यामेवानुमितिसंभवे विशिष्टपरामर्शः किमर्थमंगी-
कर्तव्य इति चेन्न वह्निव्याप्यधूमवानयमिति शाब्दपरामर्शस्य लोपप्रसंगात्सावयवकत्वात्लाघवे-
न सर्वत्र परामर्शस्यैव कारणत्वात् न लिंगं करणं अतीतादौ व्यभिचारात् व्यापारवत्कारणमसा-
धारणं कारणमिति मते परामर्शद्वारा व्याप्तिज्ञानं करणं तज्जन्यत्वे सति तज्जन्यजनको व्या-
पारः अनुमानमुपसंहरति तस्मादिति लिंगं विभजते लिंगमिति अन्वयव्यतिरेकिणं ल-
क्षयति अन्वयेति हेतुसाध्ययोर्व्याप्तिः तद्भावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः केवलान्वयिनो

पर्वतो वह्निमानिति प्रतिज्ञा धूमवत्त्वादिति हेतुः यो यो धूमवानिति उदाहरणं तथा
चायमित्युपनयः तस्मात्तथेति निगमनं स्वार्थानुमितिपरार्थानुमित्योर्लिंगपराम-
र्श एव करणं तस्माल्लिंगपरामर्शोऽनुमानं लिंगं त्रिविधम् अन्वयव्यतिरेकि केवला-
न्वयि केवलव्यतिरेकि चेति अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि य-
था वह्नौ साध्ये धूमवत्त्वं यत्र यत्र धूमस्तत्र तत्र वह्निरिति अन्वयव्याप्तिः यत्र वह्नि-
र्नास्ति तत्र धूमो नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः ॥ ॥

लक्षणमाह अन्वयेति केवलान्वयिसाध्यकं केवलान्वयि अत्यंताभावाप्रतियोगित्वं
केवलान्वयित्वं ईश्वरप्रमाविषयत्वं सर्वाभिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः
व्यतिरेकिणमुदाहरति पृथिवीति ननु इतरभेदः प्रसिद्धो वा न वा आद्ये यत्र प्रसि-
द्धस्तत्र हेतुसत्वे अन्वयित्वं असत्वे असाधारण्यं द्वितीये ज्ञानाभावात्कथं तद्वि-
शिष्टानुमितिः विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात् प्रतियोगिज्ञानाभा-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ज्ञत्वादिचयोः श्रान्योन्याभाववानोत्रयोः सम्प्रत्येकं प्रति ह्यालोमेतन्नेत्यविव्याप्तासाधा
तेत्र येषु घत्वावच्छिन्नसाध्यसमानाधिकरणताहृतित्वाभावात् ॥ नान्वयित्वात्साधार
ण्ये अनेकाधिकरणाप्रसिद्ध्या तत्साध्यविशिष्टानुमितिः ॥ व्यतिरेकव्याप्तिरूपरांचे
ति ॥ पदलक्षणमाह ॥ साध्येति ॥ ननु श्रवणानंतरेभाविमनोस्यहेत्वव्याप्तिः ॥ तत्रवेद
वाक्ये तात्पर्यानिश्चितत्वेन संदेहाभावात् ॥ किंच प्रत्यक्षेण गृहीये हेतुवान् अनुमितितत्र
व्याप्तिरिति चेन्न ॥ उक्तपदलक्षणस्य पदेन लक्षणत्वात् ॥ सपक्षलक्षणमाह ॥ नि
अन्वयमात्रव्याप्तिकं केवलान्वयि ॥ यथा घटोभिधेयः ॥ प्रमेयत्वात्पटवदिति ॥ अ
त्र प्रमेयत्वादभिधेयत्वयोः व्यतिरेकव्याप्तिर्नास्ति ॥ एवं सत्प्रमेयत्वादभिधेयत्वा
व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि ॥ यथा पृथिवीतरेभ्यो भिद्यते गंध
वत्वात् ॥ यदितरेभ्यो न भिद्यते न तद्गंधवत् ॥ यथा जलं ॥ न चेयं तथा ॥ तस्मान्न तथेति
अत्र यद्गंधवत् तदितरभिन्नमिति अन्वयदृष्टान्तो नास्ति ॥ पृथिवीमात्रपक्षत्वात् ॥ संदि
ग्धसाध्यवान्पक्षः ॥ यथा धूमवत्त्वे हेतौ पर्वतः ॥ निश्चितसाध्यवान्सपक्षः ॥ यथा तत्रै
व महानसः ॥ निश्चितसाध्याभाववान्विपक्षः ॥ यथा तत्रैव ॥ ॥
ह्रदेति ॥ विपक्षलक्षणमाह ॥ साध्याभावेति ॥ एवं सद्धेतुं निरूप्य असद्धेतुं निरूपयति ॥
सव्यभिचारेति ॥ अनुमितिप्रतिबंधकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं सव्य
भिचारं विभजते ॥ सव्यभिचार इति ॥ साधारणत्वं लक्षयति ॥ तत्रेति ॥ उदाहरति ॥ यथेति ॥

21

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३
त॰टी
११

22

असाधारणं लक्षयति सर्वेति अन्वयसहचारलक्षणमाह अन्वयेति विरुद्धं लक्षयति साध्ये
ति सत्प्रतिपक्षं लक्षयति यस्येति असिद्धं विभजते असिद्ध इति आश्रयासिद्धमुदाहरति
गगनेति स्वरूपासिद्धमुदाहरति शब्द इति व्याप्यत्वासिद्धस्य लक्षणमाह सोपाधिक
इति उपाधिलक्षणमाह साध्येति उपाधिश्चतुर्विधः केवलसाध्यव्यापकः पक्षधर्मा
वच्छिन्नसाध्यव्यापकः उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति आद्यः आर्द्रेंधन
संयोगः द्वितीयो यथा वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्ष

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः सव्यभिचारोऽने
कांतिकः स त्रिविधः साधारणासाधारणानुपसंहारिभेदात् तत्र साध्याभावव
द्वृत्तिः साधारणोऽनैकांतिकः पर्वतो वह्निमान् प्रमेयत्वादिति प्रमेयत्वस्य
वह्न्यभाववति ह्रदे विद्यमानत्वात् सर्वपक्षव्यावृत्तोऽसाधारणः यथा शब्दो
नित्यः शब्दत्वादिति शब्दत्वं सर्वेभ्यो नित्येभ्यो व्यावृत्तं शब्दमात्रवृत्ति अन्व
यव्यतिरेकदृष्टांतरहितोऽनुपसंहारी यथा सर्वमनित्यं प्रमेयत्वात् अत्र
सर्वस्यापि पक्षत्वाद्दृष्टांतो नास्ति साध्याभावव्याप्तो हेतुर्विरुद्धः यथा शब्दो
नित्यः कृतकत्वात् कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तं साध्याभा

त्वव्यापकं उदाहरणं तृतीयो यथा ध्वंसप्रागभावो विनाशी जन्यत्वादित्यत्र जन्यत्वा
वच्छिन्नानित्यत्वव्यापकं भावत्वं चतुर्थोऽत्र प्रागभावो विनाशी प्रमेयत्वादित्यत्र जन्य

एन
११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बाधितस्य लक्षणमाह॥ यद्वेति॥ अत्र बाधितस्य ग्राह्याभावनिश्चयवत्त्वेन सत्प्रतिप
क्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षात् अनुमितिप्रतिबंधकत्वं इतरेषां तु परामर्शप्र
तिबंधकत्वं॥ न चापि साधारणस्यापि व्यभिचारज्ञानं तथापि विरुद्धस्य समानाधिक
रणाभाववत्तया व्याप्यत्वासिद्धस्य विशिष्टव्याप्त्यभावेन पक्षसाधारणान्तर्भावः॥
यस्य विद्यते सः सत्प्रतिपक्षः॥ यथा शब्दो नित्यः श्रावणत्वात् शब्दत्ववत्॥ शब्दो
नित्यः कार्यत्वात् घटवत्॥ असिद्धस्त्रिविधः॥ आश्रयासिद्धः स्वरूपासिद्धो व्या
प्यत्वासिद्धश्चेति॥ आश्रयासिद्धो यथा॥ गगनारविंदं सुरभि अरविंदत्वात् सरोजा
रविंदवत्॥ अत्र गगनारविंदमाश्रयः स च नास्त्येव॥ स्वरूपासिद्धो यथा शब्दो
गुणः चाक्षुषत्वात्॥ अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्॥ सोपा
धिको व्याप्यत्वासिद्धः॥ साध्यव्यापकत्वे सति साधनाव्यापकत्वं उपाधिलक्षणे
साध्यसमानाधिकरणात्यंताभावाप्रतियोगित्वं साध्यव्यापकत्वं॥ साधनव
न्निष्ठात्यंताभावप्रतियोगित्वं साधनाव्यापकत्वं॥ पर्वतो धूमवान् व
ह्निमत्त्वात्॥

हारिलो ब्रीह्निसंशयाधायकत्वेन च व्याप्तिज्ञानप्रतिबंधकत्वं॥ आश्रयासिद्ध

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वेनासिद्धयोः पक्षधर्मताज्ञानप्रतिबंधकत्वं उपाधिस्तु व्यभिचारज्ञानाद्वा
व्याप्तिज्ञानप्रतिबंधकः सिद्धसाधनं तु तत्तद्विघटकतया आश्रयासिद्धेऽ
प्तिः
इत्थं च आर्द्रेंधनसंयोग उपाधिः यत्र धूमस्तत्र आर्द्रेंधनसंयोग इति साध्य
व्यापकता यत्र वह्निस्तत्रार्द्रेंधनसंयोगो नास्ति अयोगोलके आर्द्रेंध
नसंयोगाभावात् इति साधनाव्यापकता एवं साध्यव्यापकत्वे सति सा
धनाव्यापकत्वादार्द्रेंधसंयोग उपाधिः सोपाधिकत्वाद्वह्निमत्त्वं व्याप्य
त्वासिद्धं यस्य साध्याभावः प्रमाणांतरेण निश्चितः स बाधितः यथा वह्निर
नुष्णः द्रव्यत्वात् अत्र अनुष्णत्वं साध्यं तदभावः उष्णत्वं त्वक्प्रत्यक्षेण च
गृह्यते इति बाधितत्वं। समाप्तोयमनुमानखंडः॥ शुभमस्तु

तर्कवृत्तिनिबद्धस्यानंतरमितितद्वीनाः॥ इति श्रीमदन्नंभट्टोपाध्यायविरचितायां
तर्कदीपिकायामनुमानखंडः समाप्तिमगमत्॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उपमानं लक्षयति करणमिति । [illegible] वाक्यं लक्षयति आप्तेति
पदलक्षणमाह । शक्तमिति । अर्थस्मृत्यनुकूलः पदपदार्थयोः संबंधः शक्तिः । सा च पदार्था
न्तरमिति मीमांसकाः । तान्निराकर्तुमाह । अस्मादिति । डित्थादीनामिव घटादीना
मिति शेषः । केवलशक्तिः । ननु पदार्थान्तरमित्यर्थः । गवादिपदानां जातावेव शक्तिः । विशे
षणतया जातेः प्रथममुपस्थितत्वात् व्यक्तिलाभस्त्वाक्षेपादिनेति केचित् । तन्न । गामा
नयेत्यादौ वृद्धव्यवहारे सर्वेषां आनयनादिक्रियान्वयसंभवेन जातिविशिष्टव्यक्तावेव
शक्तिकल्पनात् । शक्तिग्रहश्च वृद्धव्यवहारेण व्युत्पित्सुबालो गामानयेत्युत्तमवृद्ध

उपमितिकरणमुपमानम् । संज्ञासंज्ञिसंबंधज्ञानमुपमितिः । तत्करणं सादृश्य
ज्ञानं । अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः । तथा हि । कश्चिद्गवयपदार्थ
मजानन् कुतश्चिदारण्यकपुरुषात् गोसदृशो गवय इति श्रुत्वा वनं
गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति । तदनन्तरं असौ गवय
पदवाच्य इत्युपमितिरुत्पद्यते । शब्दं लक्षयति । आप्तवाक्यं शब्दः । आप्तस्तु
यथार्थवक्ता । वाक्यं पदसमूहः । यथा गामानयेति । शक्तं पदं । अस्मात्पदादयम्

वाक्यश्रवणानन्तरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गामानयनं च दृष्ट्वा मध्यमप्रवृ
त्तिप्रवृत्तिजनकज्ञानं अन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य अश्वमानय
गां बधानेत्यादिवाक्यान्तरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः अ
श्वपदस्य अश्वत्वविशिष्टे इति व्युत्पद्यते । ननु सर्वत्र कार्यपरत्वात् व्यवहारस्य
कार्यपरवाक्य एव व्युत्पत्तिः न सिद्धपर इति चेन्न । काश्यां त्रिभुवनतिलको भू
पतिरित्यादौ सिद्धेपि व्यवहारात् । विकसितपद्मे मधुकर इत्यादौ प्रसिद्धपदसम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लक्षणापि शब्दवृत्तिः शक्यसंबंधो लक्षणा गंगायां घोष इत्यादौ गंगापदवाच्यप्रवाहसंबंधा द्वतीरोपस्थितौ तीरे विशक्तिर्न कल्प्या चेत् सैंधवादौ लवणाश्वयोः परस्परसंबंधाभा वान्न शक्तिकल्पने लक्षणा त्रिधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति यत्र वाच्यार्थस्यान्वयाभावः तत्र जहतीति यथा मंचाः क्रोशन्तीति यत्र वाच्यस्यापि अन्वयः तत्राजहतीति यथा छत्रिणो गच्छन्तीति यत्र वाच्यैकदेशत्यागेनैकदेशान्वयः तत्र जहदजहतीति यथा तत्त्वमसीति गौण्यपि लक्षणैव लक्ष्यमाणगुणसंबंधरूपा अग्निर्माणवक इति व्यंजनापि शक्तिलक्षणान्तर्भूता अर्थे शक्तिमूला च अनुमानादिनान्यथासिद्धा तात्पर्यानुपपत्तिर्लक्षणाबीजं तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यं

आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा अर्थाबाधो योग्यता

ज्ञानं च वाक्यार्थज्ञानहेतुः नानार्थानुरोधात् प्रकरणादिकं तात्पर्यग्राहकं द्वारमित्यादौ पिधेहि शब्दाध्याहारः ननु अर्थज्ञानार्थत्वात् शब्दस्य अर्थमविज्ञाय शब्दाध्याहारासंभवात् अर्थाध्याहार एव युक्त इति चेन्न पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञानहेतुत्वात् अन्यथा घटः कर्मत्वमानयनं कृतिरित्यत्रापि शाब्दबोधप्रसंगात् पंकजादिपदेषु योगरूढिः अवयवशक्तिर्योगः समुदायशक्तिः रूढिः नियतपद्मत्वज्ञानार्थं समुदायशक्तिः अन्यथा कुमुदेऽपि प्रयोगप्रसंगः इत्यन्वितेष्वेव शक्तिरिति प्रभाकराः अन्वयस्य वाक्यार्थतया भानसंभवात् अन्वयांशेऽपि शक्तिर्न कल्पनीयेति गौतमीयाः आकांक्षेति आकाङ्क्षादिज्ञानमित्यर्थः अन्यथा आकांक्षादिभ्रमात् शाब्दभ्रमो न स्यात् आकांक्षालक्षणमाह पदस्येति योग्यतालक्षणमाह अर्थेति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सन्निधिलक्षणमाह। पदानामिति। अविलंबेन पदार्थोपस्थितिः सन्निधिः। उच्चारणं तु तदुप
योगितया उक्तं। नो चेदिति। घटः कर्मत्वमित्यनाकांक्षोदाहरणं द्रष्टव्यं वैदिकस्य विशेष
माह वैदिकमीश्वरोक्तत्वादिति। ननु वेदस्यानादित्वात्कथमीश्वरोक्तमिति चेन्न। वर्णो
क्तेश्च। वाक्यसमूहत्वाद्भारतादिवत्। न चास्मर्यमाणकर्तृकत्वमुपाधिः। गोतमादि
भिः शिष्यपरंपरया वेदेपि कर्तृस्मरणेन साधनव्यापकत्वात्। तस्मात् प्रलये नानुत्पन्ना वे
दास्तु जायन्त इति श्रुतेश्च। ननु वर्णा नित्याः। स एवायं गकार इति प्रत्यभिज्ञाबलात्। तथा
च कथं वेदस्यानित्यत्वमिति चेन्न। उत्पन्नो गकारो नष्टो गकार इति प्रतीत्या वर्णानाम

पदार्थानामविलंबेनोच्चारणं सन्निधिः। आकांक्षादिरहितं वाक्यमप्रमाणं। यथा गौ
रश्वः पुरुषो हस्तीति न प्रमाणं आकांक्षाविरहात्। अग्निना सिंचेदिति न प्रमाणं
योग्यताविरहात्। प्रहरे प्रहरे असहोच्चारितानि गामानयेति पदानि न प्रमाणं
सान्निध्याभावात्। वाक्यं द्विविधं। वैदिकं लौकिकं च। वैदिकमीश्वरोक्तत्वात्सर्वमे
व प्रमाणं। लौकिकं च आप्तोक्तं प्रमाणं। अन्यदप्रमाणं। वाक्यार्थज्ञानं शाब्दज्ञानं
तत्करणं शब्दः। इति यथार्थानुभवो निरूपितः।

नित्यत्वात्। सोयं गकार इति प्रत्यभिज्ञा तु
सेयं दीपज्वालेतिवत्सजातीयावलंबनत्वात्। वर्णानां नित्यत्वेपि आनुपूर्वीविशिष्टवाक्य
स्यानित्यत्वाच्च। तस्मादीश्वरोक्तो वेदः। मन्वादिस्मृतीनां आचाराणां च वेदमूलकतया प्र
माणं। स्मृतिमूलवाक्यानां इदानीमनध्ययनात् तन्मूलभूता काचिच्छाखा विच्छिन्नेति
कल्प्यते। ननु पठ्यमानवेदवाक्योत्सन्नकल्पनापेक्षया विप्रकीर्णवाद
स्मृत्युक्तत्वान्नित्यानुमेयवेदमूलमिति चेन्न तथा वर्णानुपूर्वेतो

[illegible]

नन्वेतानि पदानि स्मारितार्थसंसर्गवन्ति आकांक्षादिमत्पदकदंबकत्वात् मद्वाक्यवदित्यनुमा
नादेव संसर्गज्ञानसंभवात् शब्दो न प्रमाणांतरमिति चेन्न अनुमित्यपेक्षया पूर्वोक्तज्ञानस्य
विलक्षणस्य शब्दात् प्रतीमीत्यनुव्यवसायसाक्षिकस्य सर्वैरभ्युपगतत्वात् नन्वर्थापत्तिरपि प्रमा
णांतरमस्ति तथाहि पीनोयं देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा पीनत्वान्यथानुपपत्त्या
रात्रिभोजनमर्थापत्त्या कल्प्यत इति चेन्न देवदत्तो रात्रौ भुंक्ते दिवाऽभुंजानत्वे सति पीनत्वा
त् इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् शते पंचाशदिति संभवोप्यनुमानमेव इह व
टे यक्षः प्रतिवसतीत्यैतिह्यमपि अनाप्तमूलकत्वे न प्रमाणं आप्तमूलकत्वे शब्द एव चेष्टापि लिपिवदनुमानद्वारा शा
ब्दबोधहेतुरिति न प्रमाणांतरं तथा च प्रत्यक्षानुमानोपमानशब्दाश्चत्वार्येव प्रमाणानि
ज्ञानानां तद्वति तत्प्रकारकत्वं स्वतो ग्राह्यं परतो वेति विचार्यते तत्र विप्रतिपत्तिः ज्ञा
नप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा अत्र विधिको
टिः स्वतस्त्वं निषेधकोटिः परतस्त्वं अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदि
ति इदं ज्ञानमप्रमेति ज्ञानेन प्रामाण्याग्रहात् बाधवारणाय तदप्रामाण्याग्राहकेति
इदं ज्ञानमप्रमेत्यनुव्यवसायग्राहकस्यापि अनुव्यवसायस्य तद्ग्राहकत्वात् स्वतस्त्वं
न स्यात् असंभवादिति तस्मिन्नप्रामाण्ये अप्रामाण्यग्राहकेत्युक्तेः उदाहृतस्थले
व्यवसायप्रामाण्यग्राहकस्यापि अनुव्यवसायस्य तदप्रामाण्याग्राहकत्वात् स्वतस्त्वसिद्धिः ननु
स्तत एव प्रामाण्यग्रहणे घटमहं जानामीत्यनुव्यवसायेन घटघटत्वयोरिति संबं
धस्यापि विषयीकरणात् व्यवसायरूपप्रामाण्यस्यैवान्यत्वात् पुरोवर्तिनि प्रकार
संबंधस्यैव प्रामाण्यपदार्थत्वादिति चेन्न स्वतः प्रामाण्यग्रहे ज्ञानेनैव प्रमानवे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वनभ्यासदशापन्नप्रमात्वसंशयो न स्यात्। तस्मात् स्वतो ग्राह्यत्वाभावात्। परतो ग्राह्यत्वं अ
नुव्यवसायेन प्रामाण्यस्य निश्चितत्वात्। तथा हि। प्रथमं जलज्ञाने जाते प्रवृत्तौ सत्यां जलला
भे सति पूर्वोत्पन्नं जलज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात्। यन्नैवं तन्नैवं। यथाप्र
मेति व्यतिरेकिणा प्रमात्वं निश्चीयते। द्वितीयादिज्ञाने तु पूर्वज्ञानदृष्टान्तेन त
त्सजातीयत्वलिंगेन। अन्वयव्यतिरेकिणापि गृह्यते। प्रमाया गुणजन्यत्वं। उत्प
त्तौ परतस्त्वं। प्रमायाः असाधारणं कारणं गुणाः। अप्रमायाः असाधारणं कारणं दोषः। तत्र
प्रत्यक्षे विशेष्यवति तद्विशेषणसन्निकर्षो गुणः। अनुमितौ व्यापकवति व्याप्यज्ञानं। उपमि
वी० तौ यथार्थसादृश्यज्ञानं। शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्यादि ऊहनीयं। दूरे वर्त्ति
त्वप्रकाराभाववत्समवधानादिदोषेणानुपस्थितत्वात्। अप्रमात्वं परत एव गृह्यते। पित्ता
दिदोषजन्यत्वादुत्पत्तौ परतस्त्वं च। ननु सर्वेषां ज्ञानानां यथार्थत्वात् अयथार्थज्ञानमे
व नास्ति। न च शुक्ताविदं रजतमिति ज्ञानानां प्रवृत्तिदर्शनात् अन्यथाख्यातिसिद्धि
रिति वाच्यम्। रजतं स्मृतिपुरोवर्त्तिज्ञानाभ्यामेव प्रवृत्तिसंभवात्। उपस्थितेष्टभे
दाग्रहस्यैव सर्वत्र प्रवर्त्तकत्वेन नेदं रजतमित्यादावतिप्रसंगाभावादिति चेन्न
सत्यरजतस्थले पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य लाघवेन प्रवृत्ति
जनकत्वात् शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पना
त्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥ राम ॥ राम ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

30

अयथार्थानुभवं विभजते अयथार्थेति स्वसमस्थमानस्य विपर्ययरूपत्वात्तत्रैव विद्याविरो
धः संशयविपर्ययमाह एकेति घटपटादौ समूहालम्बनेऽतिव्याप्तिवारणाय एकेति
घटो द्रव्यमित्यादावतिव्याप्तिवारणाय विरुद्धेति घटत्वविरुद्धघटत्वाभावनित्यत्वाति
व्याप्तिवारणाय नानेति विपर्ययलक्षणमाह मिथ्येति तदभाववति तत्प्रकारकमिति
अयथार्थः तर्कं लक्षयति व्याप्येति यद्यपि तर्को विपर्ययेऽन्तर्भवति तथापि प्रमाणा
नुग्राहकत्वात् भेदेन कीर्तनं स्मृतिं विभजते स्मृतिरिति सुखं लक्षयति सर्वेति

अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात् एकस्मिन्धर्मिणि विरुद्ध
नानाधर्मकोटिकं ज्ञानं संशयः यथा स्थाणुर्वा पुरुषो वेति मिथ्याज्ञानं वि
पर्ययः यथा शुक्ताविदं रजतमिति व्याप्यारोपेण व्यापकारोपस्तर्कः यथा यदि व
ह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति स्मृतिरपि द्विधा यथार्थाऽयथार्था च प्रमाज
न्या यथार्था अप्रमाजन्या अयथार्था सर्वेषामनुकूलवेदनीयं सुखं सर्वे
षां प्रतिकूलवेदनीयं दुःखं इच्छा कामः क्रोधो द्वेषः कृतिः प्रयत्नः विहितकर्मजन्यो
धर्मः निषिद्धकर्मजन्यस्त्वधर्मः

इत्यहमित्याद्यनुव्यवसायगम्यसुखत्वादिकमेव लक्षणं यथाश्रुतं तु स्वरूपकथनमि
ति द्रष्टव्यम् संस्कारं विभजते संस्कार इति संस्कारत्वजातिमान्संस्कारः वेगस्याश्रयमा
ह वेग इति वेगत्वजातिमान्वेगः भावनां लक्षयति अनुभवेति आत्मादावतिव्या
प्तिवारणाय अनुभवेति अनुभवध्वंसे अतिव्याप्तिवारणाय स्मृतीति स्मृतेरपि संस्का

[illegible]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्ति

स्थितिस्थापकत्वं लक्षयति । अन्यथेति । संख्यादयो द्वेषैर्नैमित्तिकद्रवत्वान्तवेगस्थितिस्थापकाः सा
मान्यगुणाः अन्ये रूपादयो विशेषगुणाः । द्रव्यविभाजकोपाधिद्वयसमानाधिकर
णवृत्तिजातिमत्वं विशेषगुणत्वं । कर्मणो लक्षणमाह । चलनेति । उत्क्षेपणादी
नां कार्यभेदमाह । ऊर्द्धेति । वक्रतासंपादकमाकुंचनं । ऋजुतासंपादकं प्रसारणं
मित्यर्थः । सामान्यं लक्षयति । नित्यमिति । संयोगोऽतिव्याप्तिवारणाय नित्यमिति
परमाणुपरिमाणादावतिव्याप्तिवारणायानेकेति । अनुगतत्वे समवेतत्वे तेन

बुद्ध्यादयोऽष्टावात्मगुणाः । बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च । नित्या ईश्वरस्य । अनित्या
जीवस्य । संस्कारस्त्रिविधः । वेगो भावना स्थितिस्थापकश्चेति । वेगः पृथिव्यादिच
तुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः । अन्यथाकृत
स्य पुनस्तदवस्थापादकः स्थितिस्थापकः । कटादिपृथिवीवृत्तिः । चलनात्मकं कर्मः । उ
र्ध्वदेशसंयोगहेतुरुत्क्षेपणम् । अधोदेशसंयोगहेतुरपक्षेपणं । सन्निकृष्टसंयोगहे
तुराकुंचनं विप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् । पृथिव्यादिचतुष्ट

व॰ नाभावान्नातिव्याप्तिः । विशेषं लक्षयति । नित्यद्रव्येति । समवायं लक्षयति । नित्यसंबंधेति ।
संयोगोऽतिव्याप्तिवारणाय नित्येति । आकाशादावतिव्याप्तिवारणाय संबंध इति । अयु
तसिद्धलक्षणमाह । ययोरिति । नीलो घट इति विशिष्टप्रतीतिः । विशेषणविशेष्यसंबं
धविषया विशिष्टप्रत्ययत्वाद्दण्डीति प्रत्ययवदिति । अनुमानेन संयोगादीनां बाधात्
समवायसिद्धिः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अवयवावयवविनाशेति द्रव्यसमवायिकारणासमवायः जन्यद्रव्यावयवि आश्रयत्वेन द्रवति अनादिमिति आकाशादावतिव्याप्तिवारणाय सांतइति घटादावतिव्याप्तिवारणाय अनादिरिति प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनकः भविष्यतीतिव्यवहारहेतुः प्रागभावः ध्वंसलक्षणमाह सादिरिति घटादावतिव्याप्तिवारणाय अनंतेति आकाशादावतिव्याप्तिवारणाय सादिरिति प्रतियोगिजन्यः प्रतियोगिसमवायिवृत्तिः

नित्यमेकमनेकानुगतं सामान्यं द्रव्यगुणकर्मवृत्तिः परंसत्ता अपरं द्रव्यत्वादि नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः नित्यसंबंधः समवायः अयुतसिद्धवृत्तिः ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावंतौ जातिव्यक्ती नित्यद्रव्ये चेति अनादिसांतः प्रागभावः उत्पत्तेः पूर्वं कार्यस्य सादिरनंतः प्रध्वंसः उत्पत्त्यनंतरं कार्यस्य त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यंताभावः यथा भूतले घटो नास्तीति

ध्वस्त इति व्यवहारहेतुर्ध्वंसः अत्यंताभावं लक्षयति त्रैकालिकइति अन्योन्याभावेऽतिव्याप्तिवारणाय संसर्गावच्छिन्नइति ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिकइति अन्योऽन्याभावं लक्षयति तादात्म्येति प्रतियोगितावच्छेदके आरोप्यसंसर्गभेदादेकप्रतियोगिकयोरत्यंताभावअन्योन्याभावयोर्भेदः तत्त्वे केवलघटत्वादिना भावाद्द्वयाभावइति प्रतीत्याविशिष्टाभावः एकसत्त्वेपि द्वयं नास्तीति प्रतीत्या द्वित्वावच्छिन्नाभावः संयोगसंबंधेन घटवतिसंबंधेन घटाभावः एतद्द्वयाभावात् घट

त्वावच्छिन्नप्रतियोगिकसामान्याभावश्चातिरिक्तः एवमन्योन्याभावोपि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

घटत्वावच्छिन्नः पटे नास्तीति व्यधिकरणधर्मावच्छिन्नाभावो नांगीक्रियते पटे घ
टत्वं नास्तीत्यर्थः। अतिरिक्तत्वे सति नित्यो कालान्यत्वे सामयिकात्यन्ताभावोऽत्यन्ता ३४
भाव एव समयविशेषे प्रतीयमानः। घटाभाववति घटानयने तदत्यन्ताभावस्यान्यत्र
गमनाभावोऽप्रतीतेः। घटापसरणे पुनः प्रतीतेश्च तत्र घटसंयोगप्रागभाव
ध्वंसरूपाभावद्वयं तदत्यन्ताभावप्रतीतिनियामकत्वं प्रकल्प्यते। घटवति तत्संयोगप्रा
गभावप्रध्वंसयोरसत्त्वात् अत्यन्ताभावाप्रतीतिः। घटापसरणे च संयोगध्वं

तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो न भवतीति॥
सर्वेषामपि पदार्थानां यथायथमुक्तेष्वेवान्तर्भावात्सप्तैव पदार्था इति सिद्धम्॥

सत्त्वात्। नास्तीति केवलाधिकरणादेव नास्तीति व्यवहारोपपत्तौ अभावो न
पदार्थान्तरमिति गुरवः। तन्न। अभावानंगीकारे केवलस्य निर्वक्तुमशक्यत्वात्।
अभावाभावोऽप्यनतिरिक्तः। अनवस्थाप्रसंगात्। प्रागभावध्वंसस्य प्रतियोग्येव
अभावभावोऽतिरिक्तः। एवं तृतीयाभावस्य प्रथमत्वात् नानवस्थेति नवीनाः॥
ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प
वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिग
म इति न्यायशास्त्रे षोडशपदार्थानामुक्तत्वात् कथं सप्तैवेत्यत आह। सर्वेषा
मिति। सर्वेषां सप्तस्वेवान्तर्भावः। आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोष

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धर्मा॰

प्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति द्वादशविधं प्रमेयं प्रवृत्तिर्धर्माधर्मौ रागद्वेषमोहाः दोषः रागइच्छा द्वेषो मन्युः मोहः शरीरादावात्मबुद्धिः प्रेत्यभावो मरणं फलं भोगः अपवर्गो मोक्षः स च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः प्रयोजनं सुखदुःखहानिः दृष्टान्तो महानसादिः प्रमाणिकत्वेन अभ्युपगतोर्थः सिद्धान्तः निर्णयो निश्चयः प्रमाणफलं तच्च बुभुत्सोः कथा वादः उभयसाधनवति विजिगीषुकथा जल्पः स्वपक्षस्थापनाहीना परपक्षदूषणमात्रावशेषा वितण्डा कथा नाम नानावक्तृकपूर्वोत्तरवाक्यसंदर्भः अभिप्रायान्तरेण प्रयुक्तस्या

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये अन्नंभट्टेन विदु
षा रचितस्तर्कसंग्रहः ॥ इति श्रीतर्कसंग्रहः समाप्तः ॥ ॥
शुभमस्तु लेखकपाठकयोः

र्थान्तरप्रकल्पनं छलं असदुत्तरं जातिः साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्तिविशेषोपपत्त्युपलब्ध्यनुपलब्धिकारणनित्यानित्यकार्यसमाजातयः वादिनोऽपजयहेतुर्निग्रहस्थानं प्रतिज्ञाहानिः प्रतिज्ञान्तरप्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरं अर्थान्तरं निरर्थकं अविज्ञातार्थं अपार्थकं अप्राप्तकालं न्यूनं अधिकं पुनरुक्तं अननुभाषणं अज्ञानं अप्रतिक्षेपः मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः अपसि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA